# ॥ दुर्गास्तोत्रम् ॥

## श्री-नारायण उवाच

स्तोत्रं च श्रूयतां ब्रह्मन् सर्वविघ्नविनाशकम्।
सुखदं मोक्षदं सारं भवसन्तारकारणम्॥

## श्रीकृष्ण उवाच

त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी।
त्वमेवाऽऽद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका॥ १॥

कार्यार्थे सगुणा त्वं च वस्तुतो निर्गुणा स्वयम्।
परब्रह्मस्वरूपा त्वं सत्या नित्या सनातनी॥ २॥

तेजःस्वरूपा परमा भक्तानुग्रहविग्रहा।
सर्वस्वरूपा सर्वेशा सर्वाधारा परात्परा॥ ३॥

सर्वबीजस्वरूपा च सर्वपूज्या निराश्रया।
सर्वज्ञा सर्वतोभद्रा सर्वमङ्गलमङ्गला॥ ४॥

सर्वबुद्धिस्वरूपा च सर्वशक्तिस्वरूपिणी।
सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी॥ ५॥

त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम्।
दक्षिणा सर्वदाने च सर्वशक्तिस्वरूपिणी॥ ६॥

निद्रा त्वं च दया त्वं च तृष्णा त्वं चाऽऽत्मनः प्रिया।
क्षुत्क्षान्तिः शान्तिरीशा च कान्तिस्तुष्टिश्च शाश्वती॥ ७॥

श्रद्धा पुष्टिश्च तन्द्रा च लज्जा शोभा प्रभा तथा।
सतां सम्पत्स्वरूपा श्रीर्विपत्तिरसतामिह॥ ८॥

प्रीतिरूपा पुण्यवतां पापिनां कलहाङ्कुरा।
शश्वत्कर्ममयी शक्तिः सर्वदा सर्वजीविनाम्॥ ९॥

देवेभ्यः स्वपदो दात्री धातुर्धात्री कृपामयी।
हिताय सर्वदेवानां सर्वासुरविनाशिनी॥ १०॥

योगनिद्रा योगरूपा योगदात्री च योगिनाम्।
सिद्धिस्वरूपा सिद्धानां सिद्धिदा सिद्धियोगिनी॥ ११॥

माहेश्वरी च ब्रह्माणी विष्णुमाया च वैष्णवी।
भद्रदा भद्रकाली च सर्वलोकभयङ्करी॥ १२॥

ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे।
सतां कीर्तिः प्रतिष्ठा च निन्दा त्वमसतां सदा॥ १३॥

महायुद्धे महामारी दुष्टसंहाररूपिणी।
रक्षास्वरूपा शिष्टानां मातेव हितकारिणी॥ १४॥

वन्द्या पूज्या स्तुता त्वं च ब्रह्मादीनां च सर्वदा।
ब्राह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम्॥ १५॥

विद्या विद्यावतां त्वं च बुद्धिर्बुद्धिमतां सताम्।
मेधा स्मृतिस्वरूपा च प्रतिभा प्रतिभावताम्॥ १६॥

राज्ञां प्रतापरूपा च विशां वाणिज्यरूपिणी।
सृष्टौ सृष्टिस्वरूपा त्वं रक्षारूपा च पालने॥ १७॥

तथाऽन्ते त्वं महामारी विश्वे विश्वैश्च पूजिते।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च मोहिनी॥ १८॥

दुरत्यया मे माया त्वं यया सम्मोहितं जगत्।
यया मुग्धो हि विद्वांश्च मोक्षमार्गं न पश्यति॥ १९॥

## ॥ फलश्रुतिः ॥

इत्यात्मना कृतं स्तोत्रं दुर्गाया दुर्गनाशनम्।
पूजाकाले पठेद्यो हि सिद्धिर्भवति वाञ्छिता ॥ २० ॥

वन्ध्या च काकवन्ध्या च मृतवत्सा च दुर्भगा।
श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम् ॥ २१ ॥

कारागारे महाघोरे यो बद्धो दृढबन्धने।
श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम् ॥ २२ ॥

यक्ष्मग्रस्तो गलत्कुष्ठी महाशूली महाज्वरी।
श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात् प्रमुच्यते ॥ २३ ॥

पुत्रभेदे प्रजाभेदे पत्नीभेदे च दुर्गतः।
श्रुत्वा स्तोत्रं मासमेकं लभते नात्र संशयः ॥ २४ ॥

राजद्वारे श्मशाने च महारण्ये रणस्थले।
हिंस्रजन्तुसमीपे च श्रुत्वा स्तोत्रं प्रमुच्यते ॥ २५ ॥

गृहदाहे च दावाग्नौ दस्युसैन्यसमन्विते।
स्तोत्रश्रवणमात्रेण लभते नात्र संशयः ॥ २६ ॥

महादरिद्रो मूर्खश्च वर्षं स्तोत्रं पठेत् तु यः।
विद्यावान् धनवांश्चैव स भवेन्नात्र संशयः ॥ २७ ॥

॥ इति श्रीब्रह्मवैवर्तमहापुराणे प्रकृतिखण्डे षड्षष्टितमेऽध्याये
श्री-नारद-नारायण-संवादे दुर्गोपाख्याने श्री-कृष्णविरचितं
श्री-दुर्गास्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Durga_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits